# Ribhuproktam Namarupanishedhanirupanam

# ઋભુપ્રોક્તં નામરૂપનિષેધનિરૂપણમ્

## Document Information

Text title : Ribhuproktam Namarupanishedhanirupanam

File name : RRibhuproktaMnAmarUpaniShedhanirUpaNam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | shaNkarAkhyaH ShaShThAMshaH | adhyAyaH 22| 34-46||

Latest update : August 5, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 5, 2023

*sanskritdocuments.org*

# ઋભુપ્રોક્તં નામરૂપનિષેધનિરૂપણમ્

(નાહમ્)

નાહં જીવો ન મે ભેદો નાહં ચિન્તા ન મે મનઃ ।
નાહં માંસં ન મેઽસ્થીનિ નાહઙ્કારકલેવરઃ ॥ ૨૨.૩૪॥

ન પ્રમાતા ન મેયં વા નાહં સર્વં પરોઽસ્મ્યહમ્ ।
સર્વવિજ્ઞાનરૂપોઽસ્મિ નાહં સર્વં કદાચન ॥ ૨૨.૩૫॥

નાહં મૃતો જન્મનાન્યો ન ચિન્માત્રોઽસ્મિ નાસ્મ્યહમ્ ।
ન વાચ્યોઽહં ન મુક્તોઽહં ન બુદ્ધોઽહં કદાચન ॥ ૨૨.૩૬॥

ન શૂન્યોઽહં ન મૂઢોઽહં ન સર્વોઽહં પરોઽસ્મ્યહમ્ ।
સર્વદા બ્રહ્મમાત્રોઽહં ન રસોઽહં સદાશિવઃ ॥ ૨૨.૩૭॥

ન ઘ્રાણોઽહં ન ગન્ધોઽહં ન ચિહ્નોઽયં ન મે પ્રિયઃ ।
નાહં જીવો રસો નાહં વરુણો ન ચ ગોલકઃ ॥ ૨૨.૩૮॥

બ્રહ્મૈવાહં ન સન્દેહો નામરૂપં ન કિઞ્ચન ।
ન શ્રોત્રોઽહં ન શબ્દોઽહં ન દિશોઽહં ન સાક્ષિકઃ ॥ ૨૨.૩૯॥

નાહં ન ત્વં ન ચ સ્વર્ગો નાહં વાયુર્ન સાક્ષિકઃ ।
પાયુર્નાહં વિસર્ગો ન ન મૃત્યુર્ન ચ સાક્ષિકઃ ॥ ૨૨.૪૦॥

ગુહ્યં નાહં ન ચાનન્દો ન પ્રજાપતિદેવતા ।
સર્વં બ્રહ્મ ન સન્દેહઃ સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૨૨.૪૧॥

નાહં મનો ન સઙ્કલ્પો ન ચન્દ્રો ન ચ સાક્ષિકઃ ।
નાહં બુદ્ધીન્દ્રિયો બ્રહ્મા નાહં નિશ્ચયરૂપવાન્ ॥ ૨૨.૪૨॥

નાહઙ્કારમહં રુદ્રો નાભિમાનો ન સાક્ષિકઃ ।
ચિત્તં નાહં વાસુદેવો ધારણા નાયમીશ્વરઃ ॥ ૨૨.૪૩॥

નાહં વિશ્વો ન જાગ્રદ્વા સ્થૂલદેહો ન મે ક્વચિત્ ।

ન પ્રાતિભાસિકો જીવો ન ચાહં વ્યાવહારિકઃ ॥ ૨૨.૪૪॥

ન પારમાર્થિકો દેવો નાહમન્નમયો જડઃ ।
ન પ્રાણમયકોશોઽહં ન મનોમયકોશવાન્ ॥ ૨૨.૪૫॥

ન વિજ્ઞાનમયઃ કોશો નાનન્દમયકોશવાન્ ।
બ્રહ્મૈવાહં ન સન્દેહો નામરૂપે ન કિઞ્ચન ॥ ૨૨.૪૬॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ઋભુપ્રોક્તં નામરૂપનિષેધનિરૂપણં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । શઙ્કરાખ્યઃ ષષ્ઠાંશઃ । અધ્યાયઃ ૨૨। ૩૪-૪૬॥

- .. shrIshivarahasyam . shankarAkhyaH ShaShThAMshaH . adhyAyaH 22. 34-46..

Notes :
Shiva Rahasyam Amsa-06 consists of the 50 Adhyaya-s that comprise the Ribhu Gita.
Selected verses from Ribhu Gita have been compiled here based on similarity of content.

Proofread by Ruma Dewan

*Ribhuproktam Namarupanishedhanirupanam*
pdf was typeset on August 5, 2023

Please send corrections to *sanskrit@cheerful.com*